# बुद्धि-प्रज्ञापराध-विवेचनम्।

डॉ. विद्याधीश अनन्ताचार्य काशीकर[1] डॉ. असित कुमार पांजा[2]

---

सृष्ट्युत्पत्तौ प्रथमं व्यक्ततत्त्वं यदव्यक्ताज्जातं यच्च सत्त्वसमुद्रेकान्निर्मलस्फटिकोपल-प्रख्यं चिच्छायासंक्रान्तिप्राप्तचैतन्यं पुरुषवन्नानात्मकमध्यवसेयविषयं तन्नाम महत्तत्त्वम्।[1] एतदेवाखिलसत्वेषु याऽध्यवसायिनी बुद्धिः तस्याः आधारैककारणम्। आयुर्वेददृशा तु बुद्धिर्नामैकचत्वारिंशद्गुणेष्वेकः गुणः, स चात्माख्ये द्रव्येऽधिष्ठितत्वादाध्यात्मिकगुणसंज्ञां प्रलब्धवान्। बुद्धेश्च स्थानमात्मवद्धृदयम्।[2] बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरमित्येवं न्यायसूत्रकारैर्दत्तलक्षणायाः बुद्धेश्चतुर्दश पर्यायाः मनीषादयः चेतनान्ताः श्रीमदमरसिंहेन प्रदत्ताः।[3] गर्भावस्थायां षष्ठे मासि जायमानायाः बुद्धेर्धृतिस्मृतिमेधादयः नैकाः अंशाः समुपलभ्यन्ते, तेष्वपि स्मृतिबुद्धी गर्भजभावेष्वात्मजे विद्येते; मेधा च सात्म्यजा; बुद्धिमेधास्मृतयश्च पुनः सत्वजाः।[4] गर्भशरीरे आत्मनः अवस्थितिमात्रत्वादेव स्मृतिबुद्धी वर्तेते इत्यत्रात्मजशब्दस्यार्थः, न त्वात्मनः उपादानकारणत्वम्।[5] गर्भजन्मनोऽनन्तरमप्यनेका बुद्धयः उत्पद्यन्ते; ताश्चात्मेन्द्रियमनोऽर्थसन्निकर्षजाः।[6]

यया बुद्ध्या वयं परमात्मनः स्वरूपादिवैषयिकं चिन्तनं कुर्मः तया स अतीव सूक्ष्मतमः विद्यते, सत्यप्यात्मानमपेक्ष्य स्थौल्ये सा त्विन्द्रियमनसोरप्यतीव सूक्ष्मैव।[7] बुद्धिसंख्यामनुसृत्य केचन विद्वांसः बुद्धेरेकत्वं मन्यन्ते यथा महत्, केचन षड्वं[8] यथा इन्द्रियभेदात् पञ्चविधा

---

[1] मौलिकसिद्धान्तसंहिताविभागः, राष्ट्रियायुर्वेदसंस्थानम्, जयपुरम् , राजस्थानम्।

[2] प्राध्यापकः, मौलिकसिद्धान्तसंहिताविभागः, राष्ट्रियायुर्वेदसंस्थानम्, जयपुरम् , राजस्थानम्।

मनोभवा च, केचन बहुत्वं यथा चरकमुनिः – “भेदात्कार्येन्द्रियार्थानां बह्व्यो वै बुद्धयः स्मृताः।”[9]

धीधृतिस्मृतिप्रज्ञामेधाप्रतिभाप्रत्तिपत्तिमतिपण्डादयः बुद्धेर्नैकाः बिन्दवः चरकादिग्रन्थेषु वर्णिताः दृश्यन्ते। तत्र धीर्नाम ज्ञानमुपदिष्टग्रहणशक्तिर्वा[10], धृतिस्तु मनसो नियमात्मिका बुद्धिः सन्तुष्टिर्वा[11], स्मृतिरतीतस्मरणं यदि वा गृहीतस्य विच्छेदेन धारयितुं शक्तिः[12] अनुभूतविषयाऽसम्प्रमोषो वा[13], प्रज्ञा च बुद्धिरेव तस्याः एकादश भेदाः सन्ति यथा केतुः, केतः, चेतः, चित्तं, क्रतुः, असुः, धीः, शचीः, माया, वयुनम्, अभिख्या इति।[14] मेधा तु ग्रन्थधारणशक्तिः , ग्रन्थाकर्षणसामर्थ्यं गृहीतस्याविच्छेदेन धारयितुं शक्तिर्वा।[15] प्रतिभा नाम प्रत्युत्पन्नमतित्वं, वस्तुतस्तु नवनवोन्मेषशालिनी प्रज्ञैव प्रतिभा।[16] प्रतिपत्तिस्तु अर्थावबोधप्रागल्भ्यम् यदि वा उत्पन्नायामापदि झटिति यथाकर्तव्यताज्ञानं यदि वा उपदिष्टार्थस्य सम्यगवबोधः,कर्मणां यथार्हतयाऽनुष्ठानं वा।[17] मतिरनागताज्ञानं, त्रिकालबुद्धिर्वा ।[18] पण्डा तु तत्त्वानुगा बुद्धिः।[19] एवं बुद्धेर्नैकांशानां व्याख्याः तैस्तैर्ग्रन्थकारैष्टीकाकृद्भिश्च स्वस्वग्रन्थे कृताः।

अन्येऽपि केचन बुद्धिप्रकाराः दृश्यन्ते यथा सहजा वैनायिकी च बुद्धिः। सहजा नाम जन्मना मातृपितृलब्धा बुद्धिः, वैनायिकी तु शास्त्राभ्यासकृता बुद्धिः। शास्त्राभ्यासात् बुद्ध्यां ज्ञानरूपः तत्स्मृतिरूपश्च यः संस्कारः जायते सैव वैनायिकी।[20] एकत्वबुद्धिः पृथत्त्वबुद्धिश्चेत्यन्यभेदः। यदनेकेषु भिन्नदेशकालेषु गवादिव्यक्तिषु यदयं गौरयं गौः इत्यादिप्रकारा एकाकाराबुद्धिस्तत् सामान्यम्। सैव सामान्यत्वनिर्धारिणी एकत्वबुद्धिः। एवमेव गवाश्वयोः व्यावृतत्वनिर्धारिणी विशेषा बुद्धिः पृथत्त्वबुद्धिरित्युच्यते।[21]

क्षणिकनिश्चयात्मिकभेदेनान्यद्वयबुद्धी स्तः, तत्रेन्द्रियविषयसंयोगमात्रत्वादेव तदात्वोत्पन्ना बुद्धिः अनिश्चितार्थकारिणी क्षणिकेत्यभिधीयते, अन्या तु केचित्कालान्तरभाविनी निश्चितज्ञानकारिणी निश्चयात्मिकेति।[22]

आयुर्वेददर्शनविदः प्रत्यक्षानुमानागमयुक्तिभेदेन चतुर्विधप्रमाणग्रहणं कुर्वन्ति। तान्यपि प्रमाणानि बुद्धय एवेति तेषां लक्षणैः प्रतीयते। यथा - "आत्मेन्द्रियमनोर्थानां सन्निकर्षात् प्रवर्तते। व्यक्ता तदात्वे या बुद्धिः प्रत्यक्षं सा निरुच्यते॥"[23] या बुद्धिः आत्मादीनां सन्निकर्षात् प्रवर्तते तदेव प्रत्यक्षप्रमाणम्। तथा च "व्याप्तिग्रहणादनु अनन्तरं मीयते सम्यङ् निश्चीयते परोक्षार्थो येन तदनुमानम्।"[24] इत्यत्र यद्व्याप्तिमनु निश्चितीकरणं तत्त्वध्यवसायिन्याः बुद्धेरेव कर्म। तथा चोक्तम् – " आप्तोपदेश इति शब्दरूपप्रमाणलक्षणम् उक्तं भवति; बुद्धिप्रमाणपक्षे तु आप्तोपदेशजनिता बुद्धिः प्रमाणमिति बोद्धव्यम्।"[25] एवं गुरुमुखाच्छास्त्राभ्यासजनिता वैनायिकी बुद्धिरेवागमप्रमाणमिति भणितुं पार्यते। तथा च – "बुद्धिः पश्यति या भावान् बहुकारणयोगजान् ।युक्तिस्त्रिकाला सा ज्ञेया त्रिवर्गः साध्यते यया॥" इत्यनेन युक्तिप्रमाणस्य बुद्धिजन्यत्वं सिद्धम्।[26]

बुद्धिमनसोः परस्परसम्बन्धः नैकविधैः सन्दर्भैः स्पष्टीभवति। एतावन्तःकरणत्रितये तु विद्यमानौ स्तः । बुद्धिमेधास्मृत्यादीनां तु सत्त्वजत्वं पूर्वं व्याख्यातमेव। गर्भोत्पत्तौ पञ्चमे मासि मनः प्रतिबुद्धतरं भवति, षष्ठे च बुद्धिः।[27] एवं मनसः अनन्तरमेव बुद्धेर्व्यक्तीभवनं ग्रन्थकृद्भिः मतम्। मनोबुद्धिश्चैकः बुद्धिप्रकारः विद्यते, सा च मनोऽर्थाध्यवसायिनी बुद्धिः। सत्त्वरजस्तमांसि मानसमहागुणत्वेन कथितानि, एतेषां त्रयाणामपि प्रभावः बुद्धावपि दृश्यते, यथा सात्विकाः पुरुषाः ज्ञानबुद्धिमेधास्मृतिधृतिमन्तः दृश्यन्ते, राजसाः त्वधृतिमन्तः, तामसास्त्वज्ञानिनः दुर्मेधावन्तः बुद्धिनिरोधयुक्ताश्च दृश्यन्ते।[28] मानसरोगाणां चिकित्साऽपि

ज्ञानविज्ञानधैर्यस्मृतिसमाधिभिः बौद्धिकैः भावैः कर्तव्येति चरकमतिः।[29] धृतिस्तु साक्षान्मनसो नियमात्मिकैव बुद्धिः।[30] "इन्द्रियाभिग्रहः कर्म मनसः स्वस्य निग्रहः।" इत्यनेन यथा मनसः नियमनं तु स्वयं मनसैव क्रियते, तथा धृत्याऽपि मनोनियमनं भवत्येव। अत एव प्रायः केचिद्विद्वांसः द्विविधं मनः मन्यन्ते एकं भावनात्मकं यन्मनसा नियमितमपरं च विचारशीलं यद्बुद्ध्या धृत्याख्या नियमितम्।

ऊहनं मनसा भवति वा बुद्ध्या इत्येवं संशयोत्पादकानि बहूनि सूत्राणि संहितासूपलभ्यन्ते, उभयोरपि कर्मण्यूहननिर्देशलब्धत्वात्। यथा – "चिन्त्यं विचार्यमूह्यं च ध्येयं सङ्कल्प्यमेव च। यत्किञ्चिन्मनसो ज्ञेयं तत् सर्वं ह्यर्थसंज्ञकम्।।[31]", तथा च - " तस्मात् सत्यपि निर्देशे कुर्यादूह्य स्वयं धिया। विना तर्केण या सिद्धिर्यदृच्छासिद्धिरेव सा।।[32]" अत्र कथ्यते; प्रथमं मनः ऊहनं करोति तदनन्तरं बुद्धिः प्रवर्तते, यतः बुद्धौ हि सर्वकरणव्यापारार्पणं भवति। अतः 'गङ्गायां घोषः' इतिन्यायेन अनन्तरभावितत्वादूहनं कुत्रचिद्बुद्ध्या भवतीति लिखितम्। वस्तुतः आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन ततो ज्ञानं भवति। यदि वा प्रथममिन्द्रियार्थं समनस्केनेन्द्रियेण गृह्यते, अनन्तरं मनसा गुणदोषकल्पना भवति, तदनन्तरमेव तस्मिन् विषये निश्चयात्मिका बुद्धिः जायते यया मनुजः विषयानुरूपं वक्तुं कर्तुं वा व्यवस्यति।[33]

बुद्धिस्मृतिमेधाधृत्यादयस्तु ज्ञानजनिकाः देवताः , यासां शरीरप्रवेशादनन्तरमेव अग्निवेशादयो महर्षयः स्वं स्वं तन्त्रं कर्तुं चक्षमुः।[34] अन्यत्राप्युक्तं – " या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ " इति।

आयुर्वेदस्य तु प्रयोजनं स्वास्थ्यपरिपालनातुरव्याधिप्रशमनात्मकं विद्यते। प्रयोजनस्यास्य निर्वाहणाय शास्त्रेऽस्मिन् चत्वारः पादाः कथिताः, ते च भिषक् भेषजानि भर्ता भोक्ता इति। चिकित्सासाफल्यार्थमेते सर्वे एव बुद्धिसम्पन्नाः भवेयुः। तत्रापि भिषक् नाम वैद्यः यः चतुर्षु प्रधानतमः, स परमबुद्ध्यादियुक्तः न चेत् कां चिकित्सां कर्तुमर्हतीति कृत्वा ग्रन्थकारैः स्थाने स्थाने कण्ठरवेण भिषग्बुद्धेः वर्णनं कृतम्। यथा - 'स्मृतिमान् हेतुयुक्तिज्ञो जितात्मा प्रतिपत्तिमान्। भिषगौषधसंयोगैश्चिकित्सां कर्तुमर्हति।।'[35] तथा च - 'श्रुते पर्यवदातत्वम् ' इत्यस्मिन् या श्रुतिरुक्ता सा तु प्रज्ञां बृंहयति, यथोक्तं वाग्भटेन – 'प्रज्ञां बाहुश्रुत्येन बृंहयेत्।'[36] मैत्रीकारुण्यशक्यप्रीतिप्रकृत्युपेक्षणरूपा भिषजां चतुर्विधा ब्राह्मी बुद्धिः वर्तते। तेष्वपि मैत्री तु सर्वप्राणिष्वात्मनीव बुद्धिरेव।[37] वैद्यशब्दाभिनिष्पत्तौ त्वेका मतिरप्यलम्।[38]

भर्ता तूपस्थाता परिचारको वा। स चापि बुद्धिमान् भवत्विति स्पष्टोक्तिः विद्यते यथा – 'अनुरक्तः शुचिर्दक्षो बुद्धिमान् परिचारकः। '[39] स यद्येवं न स्यात्तर्हि महाननर्थः भवितुमर्हति, यतः क्वाथपानीयपेयाविलेप्यादिसदृशाः परिभाषाः तेषां निर्माणपद्धतीश्च व्याधिपरिपीडिताः रुग्णाः न जानन्ति। वैद्योपदेशस्य यथावत् परिपालनं रुग्णेभ्यः कारयित्वा परिचारकाः चिकित्सायाः एकं पादं सम्यग्रीत्या निर्वाहयन्ति। एतत्कृते तु महती बुद्धिमत्ता आवश्यकी एव।

भोक्ता तु स्वयं रुग्णः यः व्याधिरूपाणि प्रज्ञापराधफलान्युपभुञ्जानः भेषजांश्चोपभुञ्जानः भोक्तेति संज्ञां लभते। सोऽपि रोगज्ञापकत्वं स्मृतिश्चेत्यादिभिः गुणैः सम्पन्नः चेद्व्याधिः सुखसाध्यः भवति। यतः जीर्णान्नकाललक्षणानि तथा च सूक्ष्मस्वसंवेद्यलक्षणानि यानि चिकित्सायामुपकारीणि तेषां ज्ञानं निर्देशकारित्वं च सुबुद्धिं विना भवितुं नार्हति। भेषजमपि

भोजनसहितं सात्त्विकादिगुणयुक्तत्वेन सुबुद्धिजनकं स्याच्चेच्चिकित्सोपबृंहणमेव कारयेत्। एवं भिषग्भेषजभर्तृभोक्ताश्चत्वारः भकाराः बुद्धिमन्तः भवेयुः चिकित्सासाफल्यार्थमिति सत्यमेव।

असात्म्येन्द्रियार्थसंयोगः प्रज्ञापराधः परिणामश्चैतानि त्रीण्येव व्याधिकारणानि भवन्तीति चरकमुनिना वारं वारं पञ्चषस्थलेषु स्वसंहितायामुक्तम्।[40] अभ्यर्हितो ह्यर्थः पुनः पुनरभिधीयते।[41] प्रज्ञापराधश्चासात्मेन्द्रियार्थसंयोगस्यापि हेतुत्वात् त्रिषु प्रधानं विद्यते, यदुक्तं – 'प्रधापराधाद्धहितानर्थान्पञ्च निषेवते।'[42] अधर्मरूपमप्येकं महद्व्याधिकारणं विद्यते, तस्य च मूलं पूर्वकृतमसकृत्कर्म, तयोर्योनिस्तु प्रज्ञापराध एव विद्यते।[43] अतः सर्वेषामेव रोगाणां मूलकारणत्वेन प्रधापराध एवाचार्यैः स्वीकृतः। प्रज्ञा च बुद्धेः पर्यायः, तत्कृतोऽपराधः प्रज्ञापराधः। स चाज्ञानादस्मरणादनियमनाच्च मनसो भवति। अत एवोक्तं – 'धीधृतिस्मृतिविभ्रष्टः कर्म यत्कुरुतेऽशुभम्। प्रज्ञापराधं तं विद्यात् सर्वदोषप्रकोपणम्॥'[44] अत्र च प्रज्ञापराधेऽपि त्रिविधावस्थानां क्रमशः गम्भीरता प्रतिभाति। किन्त्वाचार्येण धी-धृति-स्मृत्येवंरूपे क्रमे प्रस्थापिते सत्यपि वस्तुतस्तु धी-स्मृति-धृत्येवं क्रमः गम्भीरतामनुसृत्योचितः व्यवहारानुकूलश्च।[45]

प्रथमावस्थाप्रज्ञापराधोऽज्ञानाद्यथा धीविभ्रंशः, धीर्ज्ञानम् तस्य विभ्रंशः नाम नित्यानित्ये हिताहिते यः विषमः अभिनिवेशः जायते स एव बुद्धिविभ्रंशः कथ्यते। तेन मनुजः नित्यवस्तुनः अनित्यत्वं, अहितस्यापि हितत्वं पश्यन् तदनुरूपमाचरणं कुरुते। यथाऽर्शःसु प्रारम्भावस्थायां प्रवर्तमानं शोणितं न स्तम्भयेदित्यस्य सिद्धान्तस्याज्ञानाद् कुवैद्यः धीभ्रंशाद्यदि कुटजादिस्तम्भकभेषजप्रयोगं कारयेत्तर्हि कामलाप्रभृतीनामुद्भवः भवितुमर्हति। साधारणजनाः धीभ्रंशादेवाध्यशनदिवास्वापादि कुर्वन्तः रोगग्रस्ताः भवन्ति। ते च न जानन्ति

यद् भोजनोत्तरगुरुशीतमधुरादीनां सेवनमहितकरं विद्यते, एकादश्यां लघुतया सेव्यमानाः नैके भोज्यपदार्थाः स्वभावगुरुत्वाद् मात्रागुरुत्वाद्वोपवासस्य फलमेव न साधयन्ति। कदलीफलस्य दुग्धेन सह सेवनमपि विरुद्धत्वादहितकरमेव सम्पद्यते। व्रीहिदुग्धयोः कृतं पायसमपि व्रीहेरम्लपाकत्वाच्चाहितमेव करोति। आयुर्वेदसिद्धान्तेन च यदि पत्रशाकसेवनं कर्तव्यं तर्हि तत् 'स्विन्नं निष्पीडितरसं स्नेहाढ्यं तत्प्रशस्यते'[46] इति विधिनैव कर्तव्यं विद्यते, अन्यथा व्याधिकरमेव स्यादिति मत्वाऽचार्यैः 'अशाकभुगिति' वचनं स्वीकृतम्। एते च साधारणजनसेवमानाः अध्यशनदिवास्वापभोजनोत्तरगुर्वादिकदलीदुग्धव्रीहिपायसशाक-सेवनादयः धीविभ्रंशमूलत्वेन प्रज्ञापराधा एव विद्यन्ते, ते च बहुरोगकर्तृत्वात् त्याज्या एव। एवं परिचारकधीविभ्रमादिकमप्यनुमातव्यम्।

द्वितीयावस्थाप्रज्ञापराधः स्मृतिविभ्रमः । इत्यस्मिन् मनुजः जानन्नप्यस्मरणादपराधं करोति। एतच्च रजोमोहावृतमनसः पुरुषस्यैव भवति। तदा स दिवास्वापाध्यशनादिकम् अपथ्यत्वज्ञानादप्यस्मरणात् सेवते, स्मारितश्चेन्न सेवते। कदाचिदस्य स्मृतिभ्रंशस्य सदुपयोगः चिकित्सोपकारी सम्पद्यते, यथा विषमज्वरस्य वेगं कालं च चिन्तयन् यः ज्वर्यते तस्य स्मृतिम् इष्टैर्विचित्रैश्च विषयैर्नाशयेदिति चरकमुनिः।[47] यश्च ब्राह्ममुहूर्तोत्थापनस्य हितकारत्वं जानाति किन्तु प्रातःकालगाढनिद्राभिभूतस्मृतेः न जागर्ति, तस्य स्मृतिः '*अलार्म*' नाम्ना ध्वनियन्त्रेण पुनः प्रस्थापयितुं शक्या। शरीरमिदं नश्वरम्, आत्मैव नित्यः, जगदिदं मायिकं, ब्रह्मैव सत्यमिति तत्त्वज्ञानस्मृतेर्विभ्रमान्मनुजः मायाभिभूतः सन् भ्रमति। अत एवोक्तं – 'तत्त्वज्ञाने स्मृतिर्यस्य रजोमोहावृतात्मनः। भ्रश्यते स स्मृतिभ्रंशः स्मर्तव्यं हि स्मृतौ स्थितम्॥'[48]

तृतीयावस्थाप्रज्ञापराधस्त्वतिगहनः धृतिविभ्रंशरूपः। धृतिस्तु मनसो नियमात्मिका बुद्धिरिति पूर्वमेव प्रतिपादितम्। अस्याः विभ्रंशादहितादर्थान्नियमनं मनसः कर्तुं न शक्यते। स्थूलः नरः अतिसन्तर्पितोऽप्यबुभुक्षितोऽपि भोजनोत्तरमपि धृतिभ्रंशान्मनसोऽनियमनात् मधुरादिप्रियपदार्थभक्षणरूपानपराधान् कुर्वन्नतीव स्थूलतरः बोभवीति।

धीविभ्रंशे अज्ञानात्, स्मृतिविभ्रंशे जानन्नप्यस्मरणात्, धृतिविभ्रंशे जानन्स्मरन्नप्यनियमनात् प्रज्ञापराधः भवतीति धी-स्मृति-धृतिविभ्रंशरूपे त्रिविधप्रज्ञापराधे क्रमश उत्तरोत्तरगम्भीरता दृश्यते। यदि मनुजः ग्रीष्मव्यतिरिक्तस्य दिवास्वापस्यापथ्यतां न जानाति दिवास्वापं च भुङ्क्ते तर्हि स धीविभ्रमः, तत्र ज्ञानं दापयित्वा प्रज्ञापराधनियन्त्रणं कर्तुं शक्यम्। यदि स एवापथ्यतां जानन्नपि अस्मरणाद्भुङ्क्ते स्मारितश्चेन्न भुङ्क्ते तर्हि एष स्मृतिभ्रंशः, स्मरणं दत्वा नियन्त्रितुं शक्यः। यदि कोऽपि दिवास्वापस्यापथ्यतां जानन् तत्काले स्मरन्नपि मनसोऽनियन्त्रणात् स्वपिति तर्हि स तृतीयावस्थाकः कृच्छ्रचिकित्स्यः प्रज्ञापराधः। त एते धृतिभ्रंशिनो नराः प्रायेण स्थूलाः प्रमेहिणः अन्यश्लेष्मजव्याधिपीडिता वा दृश्यन्ते; अतिसन्तर्पणस्य धृतिभ्रंशकार्यस्य श्लेष्मप्रकोपणत्वात्। एतच्छ्लेष्मप्रकोपणं प्रायेण व्याख्यातं, वस्तुतस्तु प्रज्ञापराधेन शारीरमानससर्वदोषप्रकोपः सञ्जायते। यदुक्तं - –'धीधृतिस्मृतिविभ्रष्टः कर्म यत्कुरुतेऽशुभम्। प्रज्ञापराधं तं विद्यात् सर्वदोषप्रकोपणम्॥'

प्रज्ञापराधानां नियन्त्रणाय बुद्धिबृंहणं परमावश्यकं विद्यते। तच्च बुद्धिवर्धकैः भावाभावद्रव्यैः तथा च बुद्ध्युपरोधकतामसिकभावासेवनात् कर्तुं युज्यते। तद्विद्यसम्भाषा, सतताध्ययनादिकानि, बहुश्रुतता, बहुदेशसञ्चारः, पण्डितसेवनं, ब्राह्मीशङ्खपुष्प्यादीनां सेवनं, सम्यङ्निद्रासेवनं, सात्त्विकाहारभक्षणमित्यादिभिः बुद्धिबृंहणं भवितुमर्हति।

विषयध्यानात् सङ्गः, तस्मात्कामः, तस्मात्क्रोधः, तस्मात्सम्मोहः, तस्मात्स्मृतिविभ्रमः, तस्माद्बुद्धिनाशः ततश्च प्रणष्टिरेव जायते।[49] मोक्षरूपपुरुषार्थसाधनायापि सत्यबुद्धिजननमेवावश्यकं; यथोक्तं – 'यावन्नोत्पद्यते सत्या बुद्धिर्नैतदहं यया। नैतन्ममेति विज्ञाय ज्ञः सर्वमतिवर्तते॥'[50] अतः एष प्रज्ञापराधमार्गः मनुजान् मृत्युं प्रति नयति सत्यबुद्धिश्च मोक्षं प्रतीति बुद्ध्वा सर्वैः मार्गेणानेन प्रज्ञापराधरूपेण सर्वथा न गन्तव्यं, सत्यबुद्धिजनकसात्त्विकभावसेवनं च परमप्रयत्नेन कर्तव्यम्। तथाऽनुष्ठाने बुद्धिदेवताः श्रीगणेशसरस्वतीहनुमन्तः सर्वेभ्यो सुबुद्धिं प्रददत्विति शम्।

सरस्वत्यै नमो यस्याः प्रसादात् पुण्यकर्मभिः।
बुद्धिदर्पणसंक्रान्तं जगदध्यक्षमीक्ष्यते।।[51]

---

[1] सु.शा.1/4 डह्लणः।

[2] च.चि.9/5

[3] अमरकोषः प्र.कां.5/1

[4] अ.सं.शा.5/9-21

[5] वैद्य- रणजितराय- देसाईकृतम् 'आयुर्वेदीय पदार्थ विज्ञान' ।

[6] च.शा.1/34

[7] श्रीमद्भगवद्गीता ३-४२

[8] च.शा.1/32

[9] च.शा.1/33

[10] अ.हृ.सू.11/03 , अ.हृ.सू.5/37 हेमाद्री ।

[11] शार्ङ्ग.पू.4/21 आढमल्लः ।

[12] अ.हृ.सू.5/37 हेमाद्री।

[13] योगसूत्रम् 1/11

[14] वेदनिघण्टुः अध्यायः 3

[15] सु.सू.46/96डल्हणः, शार्ङ्ग.पू.4/21आढमल्लः, अ.हृ.सू.5/37हेमाद्री।

[16] म.भा. 12/259/1

[17] शार्ङ्ग.पू.4/21 आढमल्लः, च.सू.02/36, च.सू.07/55, च.वि/04/11 चक्रपाणिः।

[18] सु.सू.46/96 डल्हणः, शार्ङ्ग.पू.4/21 आढमल्लः।

[19] हेमचन्द्रः।

[20] च.सू.9/24 चक्र. ।

[21] च.सू.1/45 चक्र. ।

[22] च.सू.8/12

[23] च.सू.11/20

[24] च.सू.11/22 चक्र. ।

[25] च.सू.11/19 चक्र. ।

[26] च.सू.11/25

[27] सु.शा.3/30

[28] सु.शा.1/18

[29] च.सू.1/58

[30] सु.शा.01/18 डल्हणः।

[31] च.शा.1/20

[32] च.सि.2/28

[33] च.शा.1/22,23

[34] च.सू.1/39

[35] च.सू.2/36

[36] च.सू.9/6, अ.सं.सू.2/10

[37] च.सू.9/28 , च.सू.1/30 चक्र।

[38] च.सू9/22

[39] अ.हृ.सू.1/29

[40] च.सू. 1/54, च.सू.11/37, च.सू.11/43, च.नि.1/3, च.शा.1/98, च.शा.2/40

[41] च.सू.3/2 चक्रपाणिः।

[42] च.सू.28/39

[43] च.वि.3/20

[44] च.शा.1/102

[45] नि.चि.ह.द्वि.ख.पर्ण 5

[46] च.सू.27/104

[47] च.चि.3/323

[48] च.शा.1/101

[49] श्रीमद्भगवद्गीता 2/62,63

[50] च.शा.1/153

[51] च.सू.1/1 चक्रपाणिः।

सङ्केताक्षराणि -

| | |
|---|---|
| अ.सं.शा. | अष्टाङ्गसङ्ग्रहः शारीरस्थानम्। |
| अ.हृ.सू. | अष्टाङ्गहृदयम् सूत्रस्थानम्। |
| च.चि. | चरकसंहिता चिकित्सास्थानम्। |
| च.नि. | चरकसंहिता निदानस्थानम्। |
| च.वि. | चरकसंहिता विमानस्थानम्। |
| च.शा. | चरकसंहिता शारीरस्थानम्। |
| च.सि. | चरकसंहिता सिद्धिस्थानम्। |
| च.सू. | चरकसंहिता सूत्रस्थानम्। |
| चक्र. | चक्रपाणिदत्तः चरकटीकाऽयुर्वेददीपिकाकारः। |
| नि.चि.ह.द्वि.ख. | निदान-चिकित्सा-हस्तामलक द्वितीय खण्ड |
| प्र.कां. | प्रथमं काण्डम्। |
| म.भा. | महाभारतम्। |
| शार्ङ्ग.पू. | शार्ङ्गधरसंहिता पूर्वखण्डम्। |
| सु.शा. | सुश्रुतसंहिता शारीरस्थानम्। |
| सु.सू. | सुश्रुतसंहिता सूत्रस्थानम्। |